घकार आकारयुक्तः तवर्गादधराक्षरमवाप्नोति । घकार इ(ई)कारेण युक्तः पवर्गादेकमवाप्नोति । क(?)कारादयश्चतुर्थवर्गाक्षराः शेषाः षट् आकारेण युक्ताश्चतुर्थवर्गाक्षरं प्राप्नुवंति । इ(ई)कारयुक्ताः पंचमवर्गाक्षरानधराक्षरा[न्] लभन्ते अधरानुवलितत्वात् । यतौक्तं(थोक्त)क्र-[प० १९९, पा० २]मेण । एवं च चकारादयो हकारान्ताक्षरा आकारेण ईकारेण वा युक्ता यथा प्राप्नुवन्ति वर्गाक्षर(रा)स्तथाभिहत (हि ताः ।) प्रस्तारोऽत्र लिख्यते—अनन्तरस्याधस्तात्—पा थ पी भ । एवं डाकारः चकारं । डी टकारम् । स्थापनादनन्तरस्याधस्तात्—ड च डी डा । एवमेतौ द्वितीय-चतुर्थमात्रौ शेषवर्गानुस्वारे(सार)तोऽपि वक्तव्याद्या(व्यौ या)वत् स्ववर्ग [प० २००, पा० १]इति पूर्वया गाथया चवर्गं आर्द्धाक्रान्तक्रमेणेति ॥ ३२९ ॥

क-च-टादीनां पढमा, चरिमो(मा) य समं लहसु (°हं तु) कारेण ।
लभइ तवग्गे एवं, साणुस्सारे य सविसग्गे ॥ ३३० ॥

ककार(?) क च ट वर्ग-त्रयस्य ग्रहणम् । आदिशब्दाच्छेषवर्गाणामपि कवर्ग-चवर्ग-टवर्गस्य च प्रथमाः । ककार-चकार-टकारोचे(राश्चै)वम् । एते प्रश्नादौ उकारेण सह दृश्यमानाः

---

१ 'असावेवार्थः प्रस्तार्यते' अथवा 'अमुमेवार्थं प्रस्तारयति' इति भव्यम् ।

[प० २००, पा० २] किं लभंत इत्यत आह—प य स ककारा उकारयुक्ताः पकारं लभंते। चकार उकारेण युक्तः यकारम्। टकारः शकारम्। मात्रासंख्यानियमेन शेषवर्गाणामपि चरमः। एषामेव क्रमेण—ङ ञ ण एते उकारयुक्ता एत एव लभते(न्ते)। यथा ङुकार पकार(रं) ञुकार यकारं णुकार सकारं [प० २०१, पा० १] रचना—कु पु यु दु रा(स)। अस्याधस्तात्—खु पु छु रु वु षु। अस्याधस्तात्—गु जु। थु लु। दु सु। ततः पंचमः—ङु पु। ञु यु। णु सु। अस्याधः चतुर्थः—थु भु। झु वु। दु हु। एवं लब्धिकं(?)ककारवर्गस्य तथा रचना ककारस्यापि टकारस्य च। *'क च ट ा दीनां पढमा चरिमा य समं उकारेणे'*ति गाथार्थः [प० २०१, पा० २] व्याख्यातः॥ *'लभइ तवग्गे'* इत्येतत्पदं व्याख्यायते—'त प य म(स)' चतुर्णामेषां वर्णानां लब्धिरर्द्धक्रान्तिन्यायेन यथा तकार-पकार-यकार-शकाराणां उकारसहितानां क्रमेणैव लब्धिः। केषां? अकार-ककार-चकार-टकाराणां स्थापनात्। अ पु क। यु क। शु ट। अस्था० थु आ। कु ख रु ठ षु। ठ। अस्याधः—दु इ। यु ग लु। ज मु न। अस्याधस्तात्—तु अ। मु डा। यु ञ्। गु ण। अस्याधः—वु ई। भु घ। वु क। हु ढ। एवं यथा त प य स वर्गाद्यक्षराणां लब्धिक(?) ककारेण सह तथा शेषाणामपि। यथा—उकारेण सह लब्धि[:]वक्तव्या इति। व्याख्यातमेतत्पदं [प० २०२, पा० १] *'लभति तवर्गे एव'*मिति। *'साणुस्सारे य सविसग्गे'* इत्यस्य गाथापश्चार्द्धस्य व्याख्या कृ(क्रि)यते—कवर्ग-चवर्ग-टवर्गाक्षराः ककार-चकार-टकाराः सानुस्वाराः—कं चं टं एते पूर्ववद् यथा उकारसहिता लभन्ते। तद् बिंदुविसर्गाभ्यां अपि। बिन्दोर्युक्तस्योदाहरणम्—ककार[:] बिन्दुसहितः पकारं लभते, 'चं' इत्येषा(ष) प(य)कारम्, 'टं' इत्येष शकारम्। स्थापना—कं प। चं य। टं श। अस्याधः—खं फ। छं र। ठं ष। अस्याधः—म व(गं ब)। जं ल। डं स। अस्याधः—घं भ। झं व। ढं ह। अस्याधः—डा म ञु ट घ(ङं म। ञं य।) णं श। उत्तरं समासादयति। अधर-प्वु(स्तु) अधरमेव। सविसर्गोघे(प्ये)वं यथा—कः प। चः य। टः श। [प० २०२, पा० २] अस्याधः—खः फ। छः र। ध(ठ)ः ष। अस्याधः—गः ब। जः ल। डः स। अस्याधः—ङः म। ञः य। णः श। अस्याधः—घः भं। झः व। ढः ह। यथा एषां सानुस्वारस्य (स)-विसर्गक्रमेण लब्धिरुक्ता तथा 'त प य स' इत्येतेषामपि प्रस्तारः—भ(तं) अ। पं क। यं च। सं(शं) ट। अस्याधः—थं आ। पं(फं) ख। । रं छ। [षं ठ।] दं इ। पं(बं) ग। भं(लं) ज। मं ड। अस्याधः—नं अः। मं दः(ङः)। यं ञः। गं(शं) णः। [प० २०३, पा० १] अस्याधः—घं ईं। भं घ। वं झ। हं ढ। सविसर्गे(र्गो)प्येवं यथा—तः अ। पः क। यः च। सः ट। अस्याधः—थः आ। फः ख। रः छ। षः ठ। अस्याधः—दः इ। पः श। [बः ग]। लः ज। सः ड। अस्याधः—नः अ। मः ङ। यः ञ। सः ण। अस्याधः—धः ईं। भः घ। वः झ। हः ढ। सानुस्वार-विसर्गावेतौ† । अथवाऽन्यथा रचनाक्रमेण गुरुरान्(ह) ॥ ३३० ॥

† मूलादर्शे सर्वाऽपीयमक्षरस्थापना प्रभ्रष्टपाठात्मिका उपलभ्यते अतोऽधस्तात् कोष्ठकेषु शुद्धरूपेणैषा प्रदर्श्यते अस्माभिः। —संपादकः।

सानुस्वाराणां कचटानां स्थापना—

१	कं	प	चं	य	टं	श
२	खं	फ	छं	र	ठं	ष
३	गं	ब	जं	ल	डं	स
४	घं	भ	झं	व	ढं	ह
५	ङं	म	ञं	य	णं	श

सविसर्गाणां कचटानां स्थापना—

१	कः	प	चः	य	टः	श
२	खः	फ	छः	र	ठः	ष
३	गः	ब	जः	ल	डः	स
४	घः	भ	झः	व	ढः	ह
५	ङः	म	ञः	य	णः	श

सानुस्वाराणां तपयशानां स्थापना—

१	तं	अ	पं	क	यं	च	शं	ट
२	थं	आ	फं	ख	रं	छ	षं	ठ
३	दं	इ	बं	ग	लं	ज	सं	ड
४	धं	ईं	भं	घ	वं	झ	हं	ढ
५	नं	अः	मं	ङ	यं	ञ	शं	ण

सविसर्गाणां तपयशानां स्थापना—

१	तः	अ	पः	क	यः	च	शः	ट
२	थः	आ	फः	ख	रः	छ	षः	ठ
३	दः	इ	बः	ग	लः	ज	सः	ड
४	धः	ईं	भः	घ	वः	झ	हः	ढ
५	नः	अ	मः	ङ	यः	ञ	शः	ण

कचया(टा)दीणं पढमो, चरिमो य समं लभंतुकारेण ।
लभइ[प० २०३, पा० २] तवग्गे एक्कं, साणुस्सारे य सविसग्गे ॥ ३३१ ॥

'क च ट ा दि' इत्यनेन क च ट त प य श ा नां प्रथमो वर्गः । तृतीयस्वराः(वर्गः) ग ज ड द ब ल स ा नां । पञ्चमः ङ ञ ण न म ाः । एवमेवादिग्रहणं समर्थितं भवति । एते क च ट ा दयः उकारसहिता यथा – कु चु टु तु पु यु शु । मसो(एते?)धस्तात् पंचमवर्गोत्तरान् लभन्ते यथा – त प य स(श) । अ क च ट । तृतीया[प० २०४, पा० १]स्तु ग ज ड ा दयः उकारसहिता यथा – जु गु(गु जु) डु दु(बु) लु सु । एतेऽपि त्व(स्व)स्मात् क्रमेण पञ्चमो पञ्चमो लभते(?) द ब ल स ग ज ड दया (डादयः) । अंत्या उकारयुक्ता यथा – ङु ञु णु नु मु । ग(य)वर्ग-शवर्गयोः पञ्चमः क्थाशब्दः, हिक्काशब्दश्च । प्रश्नकाले तावपि श्रुत्वा पंचमस्य य-सवर्ग्गप्राप्तिर्भवति । यथा – म य य स दु । क्थ-शब्दः, हिक्काश[प० २०४, पा० २]ब्दश्च । एते सप्त । "क च ट ा दीणं पढमो तइओ चरिमो समं उकारेण लभइ तवग्गं" इत्येतद् व्याख्यातम् ॥ ३३१ ॥

ख-छ-ठादिएहि सहिया, एते उ हवंति छट्ठए वग्गे ।
घ-झ-ढाइएहिं सहिया, सत्तमवग्गे लभे एक्कं ॥ ३३२ ॥

खकार उकारयुक्तः षष्ठे पवर्गेऽक्षरमुत्तरं प्राप्नोत्युत्तरानुवलितत्वात् । छकार उकारयुक्तः शवर्गे उत्तरानुवलितत्वादुत्तरम् । ठकार उकारयुक्तः अवर्गे उत्तरानुवलितत्वात् उत्तरस्वरम् । एवं थ फ र ख ा(षा)[अ]पि । खकारः अनुस्वारयुक्तः षष्ठे पवर्गे उत्त[प० २०५, पा० १]राक्षरं लभते । स एव सविसर्गो युक्तोऽधरम् । छकारः सानुस्वारः सवर्गे उत्तरमवाप्नोति । धकारः सानुस्वारः अपवर्गे उत्तरं लभते । विसर्गयुक्तोऽधरम् । एवं छकारोऽपि [स]विसर्गयुक्तो यवर्गेऽधरमिति । एवं थ फ र ष ा वक्तव्याः । एवं गाथाप्रागर्दशक्त(?प्रागर्द्धशब्दार्थः ।) 'घ झ ढाइएहिं सहिया' उकारबिन्दुविसर्गाः । थ(घ)कार ओ(उ)कारयुक्तः सवर्गे उत्तरं लभते । बिन्दुयुक्तः सवर्ग एवोत्तरं लभते । स एव घकारः विसर्गयुक्तः तत्रैवाधरमिति । एवं ऊ(झ)कार उकारयुक्तः सप्तमे सवर्ग्गे उत्तरानुवलितत्वादुत्तरं, स एव बिन्दुयुक्तः [प० २०५, पा० २] तस्मिन्नेवोत्तरं लभते । विसर्गयुक्तः अधरम् । एवं ढकारोऽपि । एवं च सर्वहा(?भ व ह ा) अपि स्वस्मात्सप्तमं वर्गाक्षरं लभन्ते ॥३३२॥

उत्तरवंजणसहि[या], सत्तमवग्गे लभंति सेससरा ।
अहरेहि अ संयु(जु)त्ता, लभंति अहराहरे वग्गे ॥ ३३३ ॥

उत्तराः [प० २०६, पा० १] प्रथम-तृतीय-पञ्चमवर्गाक्षराः परिशिष्टैः स्वरैः 'ऊ ऐ औ' इत्येतै-स्तृ(स्त्रि)भिर्युक्ताः आत्मीयादात्मीया[न्] सप्तम ईकारयुक्तो लभ्यते । प्रश्नाक्षराणामादिस्थितस्य यदाऽग्रतः हकार इकारयुक्तो दृश्यते तदा टकार इका[प० २०६, पा० २]रयुक्तो लभ्यते । प्रश्ना-क्षराणामादिस्थितस्य यदाग्रतः टकार औकारयुक्तो दृश्यते तदा दकारो लभ्यते । अधरवर्गा [अ]-धराधरमक्षरं लभन्ते अधरस्वरयुक्ताः । इत्येष पश्चार्द्धो(र्द्ध)गाथार्थः ॥

अथवाऽस्य(स्या) गाथ(था)या व्याख्या – उत्तरव्यंजनशेषस्वराः 'ऊ ऐ औ' त्रयोऽप्येते उत्तरव्यञ्जनसहिता यथा – कू चू टू तू पू यू शू । ऊकार अधस्तात् उत्तरव्यञ्जनसहितो लभते क्रमसः(शः) सर्वस(?)वर्गं यथा – श अ क च ट त प । तथा उत्तरव्यञ्जना येषु वर्गेषु अधरानुवलि-

तत्वादधराक्षरान् । तथा उत्तरव्यञ्जनाः—गूजूङूदू[प० २०७, पा० १]बूलूसू एषां लब्धि । क्रमेणैव स इ ग ज ड द बाः, एषु वर्गेषु अधरानुवलितत्वादधरं लभन्ते । तथा ङूञूणूनूमू क्रमस(शः) सप्तमवर्गा यथा क्रमेण चि(चे)त्यधरानुवलितत्वादधरा(र)मिति । ई(ऐ)कार उत्तरव्यञ्जनसहितः यथा—कै चै टै तै पै यै शै । लब्धिस्तु क्रमसः(शः) एषु वर्गेषु तृ(त्रि)धा भवति । [†.....] तत्त्वादधराक्षरं । ञु । अ क च ट त प । एवं ग ज ड दयोऽपि ऐकारयुक्ता वक्तव्याः । ङ ञ ण ना दयश्चेति । तथा ऊ(औ)कारयुक्ता उत्तरव्यञ्जनाः । कौ चौ टौ तौ पौ यौ सौ(शौ) । लब्धिस्तु सप्तमवर्गात् अधरानुवलितत्वादधरान् । स क च ट त पाः । एवं ग ज ड दयो ङ ञ ण ना दयोऽपीति । एवं ऊकार-ऐकार-औकारयुक्ताः अधरा अधरा[न्] लभन्ते । खूछूठूथू फूरूषू । लब्धिस्तूच्यते अधरानुवलितत्वादधरानेव [प० २०७, पा० २] ष आ ख छ ठ थ फ । तथा, घूझूढूधूभूवूहू । लब्धिक्रमो वर्गेषु अधरानुवलितत्वादधराधरलब्धिः । ज इ घ झ ढ ध भ यथा ऊकारयुक्तास्तथा ऐकारौकारावपि वाच्याविति एवं अधराधरेषु लभते । इत्युक्तो गाथार्थ इति ॥ ३३३ ॥

लभइ ककारो जुत्तो, चकारवग्गंमि तइय-चरिमेण ।
ट[त]वग्गे जइ पण्हे, दसमसरो [प० २०८, पा० १] तइऔं यादीए ॥ ३३४ ॥

ककारः प्रश्नाक्षराणामादिस्थिति(त) ईकारेण सानुस्वारेण युक्तः चवर्गादेकमक्षरं लभते । उत्तरमुत्तरानुवलितत्वाल्लभते । प्रश्नाक्षराणामौकारस्यादिस्थस्य यदाग्रत आकारयुक्तो टकारो दृश्यते तदा आकारयुक्तटकार एव लभ्यते । उकारस्यादिस्थितस्य प्रश्नाक्षर(रेषु) यदाग्रतः [प० २०८, पा० २] टकारः इकारयुक्तो दृश्यते तदा टकार एव ईकारयुक्तो लभ्यते । प्रश्नाक्षराणामौकारस्य यदाग्रतः तकारः अकारयुक्तो दृश्यते तदा ताकारो लभ्यते । औकारादिस्थस्य यदाऽग्रतः तकार ईकारयुक्तो दृश्यते तदा तीकारो लभ्यते । प्रश्नाक्षराणामादिस्थस्य इकारस्य यथा(दाऽ)ग्रतः तकार आकारयुक्तो दृश्यते तदा तकार आत्मानं लभते । प्रश्नाक्षराणामादिस्थस्य इकारस्य यदाऽग्रतः तकार इकारयुक्तो दृश्यते तदा तकारो लभ्यते । औकारस्याग्रतः याकारो यदा दृश्यते तदा [प० २०९, पा० १] याकारो लभ्यते । औकारस्याग्रतः ईकारो दृष्ट ईकार एव लभ्यते । इकारस्याग्रतः याकार आत्मानं लभते ॥ ३३४ ॥

बितिय-चउत्थेहि समं, सरेहि सो चेव लभइ त-पवग्गे ।
सत्तम-णवमेहि समं, सेसेहि समं अहरवग्गे ॥ ३३५ ॥

पूर्वार्द्धो अस्य(स्या) गाथ(था)या अनन्तराक्रान्तगाथया वर्णितः । प्रश्नाक्षराणामादिस्थस्य उकारस्याग्रतः तोकारं लभते । औकारस्य प्रश्नादिस्थस्य पकार एकारयुक्तः पेकारं लभते । औकारस्य प्रश्नादिस्थस्याग्रतः पाकार औकारयुक्तः पो(पौ)कारं लभते । इकारस्य प्रश्नादिस्थस्या-[प० २०९, पा० २]ग्रतः इकारः(तकारः) तकारं लभते । इकारस्य प्रश्नादिस्थस्याग्रतः टो(ट?)कारः टोकारं लभते । ईकारस्य प्रश्नादिस्थस्याग्रतः स्थितः[तकारः?] तेकारं लभते । इकारस्य प्रश्नादिस्थस्याग्रतः तकारः तोकारं लभते । ईकारस्य प्रश्नादेरग्रतः स्थितस्य [थकारः?] थेकारं लभते । इकारस्य प्रश्नादिस्थस्य ॥ ३३५ ॥

---

† अत्रादर्शे कियान् पाठः पतितः प्रतिभाति ।

बितिएण य संजुत्तो, चकारवग्गो लभइ [प० २१०, पा० १] तइयवग्गे ।
प-यवग्गे पुण लब्भइ, चत्तारिस(म)एण संजुत्तो ॥ ३३६ ॥

चकार एकसंख्याक[कः], ककारोऽप्येकसंख्य एव । ततः संयोगा[द]र्द्धक्रान्तिकसंज्ञः । कस्मात्? तुल्यसंख्यत्वात्। यथा 'च'। स यत्रतत्रस्थः प्रभे प्व(स्व)वर्गान् प्राप्नुतः(प्राप्नोति) । टकारः ककारयुक्तोऽर्द्धक्रान्तिकसंज्ञः यथा 'ट्क'। स यत्रतत्रस्थः प्रभे पवर्गं प्राप्नोति । चतुर्थतकारेण युक्तः [प० २१०, पा० २] ककारोऽर्द्धक्रान्तमापन्नो यथोक्तः स यत्रतत्रस्थे(स्थः) प्रभे तृतीयवर्गं प्राप्नोतीति ॥ ३३६ ॥

जो अ ककारे गमओ, भणिओ सो चेव तइय-चरिमाणं ।
आइम-तइयाभिहए, लभइ तकारो हु त-पवग्गे ॥ ३३७ ॥

यथा ककारः प्रथमस्वरेण तृतीयस्वरेण वा युक्तः सवर्गाक्षरं लभते । एवं तृतीयवर्गाक्ष-
राणां ग ज ड द ब ल सा नां, चरि[प० २११, पा० १]माणां ङ ञ ण न मा नां चान्यतमाक्षरप्रभे प्रथम-
स्वरेण तृतीयस्वरेण वा युक्तः आत्मीयवर्गेऽक्षरमवाप्नोति उत्तरानुवलितत्वादुत्तरम् । खकारः
प्रथमस्वरेण युक्तः तवर्गेऽक्षरमेकं प्राप्नोति उत्तरानुवलितत्वादुत्तरम्। स एव खकारः तृतीयस्वरेण
युक्तः पवर्गेऽक्षरमेकमवाप्नोति उत्तरानुवलितत्वाउ(दु)त्तरम् ॥ ३३७ ॥

लभए वीव(इ)यजुत्तो, चकारवग्गो य तइय[प० २११, पा० २]वग्गं च ।
चत्तारिमएण समं, लभइ यकारो पवग्गं उ ॥ ३३८ ॥

चकारो द्वितीयस्वरयुक्तः टवर्गं प्राप्नोति । यकारश्चतुर्थस्वरेण य(प)वर्गं लभते ॥ ३३८ ॥

जह भेओ उ चवग्गे, तह य कवग्गंमि चेव णायव्वो ।
एवं चिय दा(ता)दीहिं, सरेहिं भेओ मुणेयव्वो ॥ ३३९ ॥

यथा चकारो द्वितीयस्वरयुक्तः तृतीयं वर्गं प्राप्नोति एवं(वं) ककारोऽपि द्वितीयस्वरयुक्तो
द्वितीयं वर्गं प्राप्नोति । तकार-चकारावप्येवमेव ॥ ३३९ ॥

एमेव सेसयाणं, चादीणं अट्ठमावसाणाणं ।
सरवग्गाण य जोगो, अद्धक्कंतक्कमो होइ [प० २१२, पा० १] ॥ ३४० ॥

एवं यथा प्रथमवर्गः शेषाक्षराणां शकाराष्टसप्तं(°ष्टमां°)तानां तृतीयवर्गाक्षराणां ग ज ड द ब
ल सा नां चतुःसंख्यानामक्षराणां यः संयोगः सार्व(?आर्द्ध)क्रान्तिकसंज्ञः । तस्य संयोगस्य अधस्तात्
थोऽक्षरः स तृतीयवर्गं प्राप्नोति । तुल्यसंख्यस्य स्वरस्याक्षरस्य च यः संयोगः सोऽप्यर्द्धक्रान्तिक-
संज्ञः । अः तृतीयवर्गं प्राप्नोति ॥ ३४० ॥

पण्हाइमसंखाए, सव्वे पण्हक्खरे गुणेऊणं ।
उवरिल्ले पक्खेउं, आइल्ले अट्ठहि विभाए ॥ ३४१ ॥
सेसं वग्गे णामक्खरं होइ ।*
जइ पुच्छइ कं म(स)रं तो, करेज्ज अह[प० २१२, पा० २]रुत्तरं कमसो॥३४२॥

* मूलादर्शे अस्या गाथाया एतादृश एव पूर्वार्द्धं उपलभ्यते । खण्डितप्राय इत्याभाति ।

प्रश्नाक्षरमध्ये उव(प)रिस्वराणां संख्या उपरिमात्रारहितानां च संयुक्ताक्षराणां या उपर्यक्षरसंख्या तामेकीकृत्य पृथग्(क्) स्थापयेत्। परिसृ(शि)ष्टानां प्रश्नाक्षराणां विद्यमानाधरस्वराणां च या संख्या तामेकीकृत्य स्थापयेत । अ क च ट त प य श वर्गाणां वसु-मुनि-रस-स(श)र-सागरा-ग्नि-यम-चन्द्राः क्रमसो(शो) गुणकारा[:] । प्रश्नाक्षराणां मात्राद्यक्षर-प्रतिबद्धो गुणाकारः, तेन गुणयित्वा स्थापितां अधोऽक्षरसंख्यामुपरि[प० २१३, पा० १]स्वराक्षरं पृथक् स्थापितां तत्रैव प्रक्षिप्याष्टभिर्भागेऽपहृते लब्धाच्छेषाच्च द्वौ वर्गौ लभ्य(भ्ये)ते । लब्धवर्गो यदाधिका(क)स्तदास्ताभिः पुनर्भागे हृते लब्धाच्छेषाश्च(च)द्वौ वर्गौ पुनर्लभ्य(भ्ये)ते । ककारादयो लब्धवर्गाः शेषाश्च ज्ञेयाः ॥ ३४१–३४२ ॥

एमेव सेसवग्गे, णामक्खरपा(या)ण हवइ एकं तु ।
जइ इच्छसि तं करणं, करणे(रे)ज्ज अधराधरं तत्तो ॥ ३४३ ॥

तत्र शेषवर्गाल(ल?)ब्धवर्गाच्च एकैकं नामाक्षरं लभ्यते । प्रश्नाक्षराणां निपतितानां मध्ये पूर्वोक्ताधराधरक्रमेणाक्षरमुत्तरमधरं वायाद्[†] ॥ ३४३ ॥

॥ **वर्गाक्षरसंयो**[प० २१३, पा० २]**गोत्पादनं समाप्तम्** ॥

अत्यु(णु)सार-विसग्गविही, ण(णा)यव्वो होइ सव्वओभणे(द्दे) ।
चउसु वि दिसासु एवं, वग्गे ण(णा)मक्खरुप्पत्ती ॥ ३४४ ॥

सर्वतोभद्र[:] प्रस्तारमंतरेण न शक्यते दर्शयितुम्। अनुस्वारविसर्गग्रहणेन शेषस्वराणामपि सूचना कृता । अतो व्यंजनस्वरयोगाच्(च)तुर्ष्वपि दिक्षु(क्ष्व)क्षरपातनिकया सुखदुःखलाभालाभजीवितमरणाद्यपि नामाक्षरोत्पत्तिरपीति प्रस्तारेण दर्श(र्श्य)त इति सर्वतोभद्रस्य महाकरश(ण)स्य मूलप्रतिबद्धादारस्या(भ्या)वरणपंचदशपर्यन्ति(न्तं) न्यासमात्रं [प० २१४, पा० १] पंक्ति पंक्ति(?) लिख्यते । तत्र मूलप्रतिबद्ध अष्टमंडलमध्ये अकार तस्य पूर्वतः एकारः । दक्षिणतः ऐकारः । अपरतः उकारः । उत्तरतः औकारः । द्वितीयवर्गे पूर्वादिगादि अ क च ट प य श । तृतीयावरणे दक्षिणादि आ ख छ ठ थ फ र ष । चतुर्थे अपरादि इ ग ज ड द ब ल स । पंचमे उत्तरादि उ घ झ ढ ध भ व ह । भूयः षष्ठावरणे पूर्वादि आदित्य-भौम-शुक्र-बुध-गुरु-शनि-चन्द्र-राहु-पर्यन्ता ग्रहाः । सूर्यां(र्य)भौमांपु(त)रे पुनर्वसु-पुष्या-श्लेषा । भौमशुक्रान्तरे मघा फाल्गुनीद्वयं च । शुक्रे हस्तः । शुक्रबु[प० २१४, पा० २]धान्तरे चित्रा स्वाति विशाखा । बु[ध]बृरा(हस्प)त्यन्तरे अनुराधा ज्येष्ठामूलानि । गुरुसनेश्चरांतरे आषाढाऽभिजित्श्रवण । बृहस्पत्योपरि पूर्वाषाढाः । सनेश्चरांतरे धनिष्ठा शतभिषा पूर्वभाद्रपदा । चन्द्रोपरि उत्तराभाद्रपदा । चन्द्रराहू न(अ)न्तरे रेवती अश्विनी भरणी चेति । राहूसूर्यान्तरे कृतिका [प० २१५, पा० १] रोहिणी मृगसिरश्चेति । सूर्योपरि आर्द्रा । एतत् षष्ठावरणं पूर्वदिगादितः ॥

मेष क ख ग घ ङ । वृषः च छ ज झ ञ । मिथुन वृषोपरि म(ग?)कारः । जकारोपरि मिथुनः । दक्षिणस्यां कर्कटकः । ततः ट ठ ड ढ ण डकारस्योपरि सिंहः । त थ द ध न दकारस्योपरि कम्पः(न्या) । अपरदिसा(शा)यां तुल्यः(ला) । प फ ब भ म [प० २१५, पा० २]पकार-

---

† त्रुटितोऽत्र कियान् पाठः, इति प्रतिभाति ।

स्योपरि वृश्चिक। य र ल व पंचमोऽयं कुंथशब्दो लकारोपरि धनुः। उत्तरतो मकरः। श ष स ह पंचमोऽयं हिंकृतः शब्दः शकारोपरि कुम्भः। क ख ग घ ङ गकारोपरि मीनः। एवं सप्तमावरणम्। अष्टममिदानीं—पूर्वादितः क च छ ज झ ञ। ट ठ ड ढ ण। च त थ द ध न। प फ ब भ म। द य र ल व। श ष स ह। त क ख ग घ ङ। च छ ज झ ञ। एवा(वम)ष्टमम्। नवमं इदानीं—पूर्वादितः च ट ठ ड ढ ण। य त थ द ध न। प फ ब भ म। श य र ल व। त श ष स ह। क क ख ग घ ङ। प च छ ज झ ञ। च ट ठ ड ढ ण। दशममिदानीम्—ट त थ द ध न। श प फ ब भ म। त य र ल व। क श ष स ह ञ। प क ख ग घ ङ। च च [प० २१६, पा० १] छ ज झ ञ। य ट ठ ड ढ ण। क त थ द ध न। एकादश(म)मिदानीं—त प फ ब भ म। क य र ल व। प श ष स ह। ञ श क ख ग घ ङ। ज च छ ज झ ञ। ञ प ट ठ ड ढ ण। त थ द ध न। क प फ ब भ म। द्वादश[म]मिदानीम्—प य र ल व। श ष स ह ञ। य क ख ग घ ङ। ट च छ ज झ ञ। श ट ठ ड ढ ण। त थ द ध न। क प फ ब भ म। प य र ल व। त्रयोदश[म]मिदानींम्—य श ष स ह। ट क ख ग घ ङ। श च छ ज झ ञ। त ट ठ ड ढ ण। क त थ द ध न। प फ ब भ म। व य र ल व। य श ष स ह ञ। चतुर्दश[म]मिदानीम्—श अ, क आ, ख इ, ग ई, घ ङ(उ?), ञ ड (ऊ?), त ए, च ए(ऐ), छ उ(ओ), ज ऊ(औ), झ अं, ञ अः। क अ, ट आ, ठ इ, द(ड) ई, ढ उ, ण ज(ऊ), ष ए, व ऐ, ष ओ, द औ, ध अं, न अः। च[अ], प आ, फ इ, ब ई, [प० २१६, पा० २] भ उ, म ऊ, य ए, र ऐ, व उ(ओ), ल ऊ(औ), व अं, ढ अः। द अ, [श] आ, [श] इ, स ई, ह उ, ख ज(ऊ), ग ए, क ऐ, ख उ(ओ), ग अ(औ), घ अं, गः(ङ) अः। पंचदश[मं]पूर्वादितः अ क च ट त प य श। ए। ऐ ख छ ठ थ फ र ष। आ। इ ग ज ड द ब ल स। ओ। औ घ झ ढ ध भ व ह। ई। अ क च ट त प य श। ए। आ ख छ ठ थ फ र ष। ऐ। इ ग ज ड द ब ल स। ई घ झ ढ ध भ व ह। औ। एवं पंचदशावर्ण(रण)पर्यन्तोऽयम् ॥ ३४४ ॥ [प० २१७, पा० १]

॥ सर्वतोभद्रः समाप्तः ॥

सर्वतोभद्र इति ग्रहरि(ऋ)क्षराश्यक्षरविधानेन येन केनचिद् यथादिस(श)मायातस्यादेस्यो(श्या)क्षराण(णि) च ग्राह्यानि। अन्यत्र विधानं इति। मंगलार्थं च इह लिखितमिति ॥ छ॥

कंठंतरिओ वि उरो, उ(प?)रभारं(वं?) सो न गच्छए मोत्तुं।
अवसेसंति(समंत?)रिओ पुण, आइल्लमणंतरं पावे ॥ ३४५ ॥

'अ इ ए उ' एते कंठ्याः। एतेषामन्यतमो[प० २१७, पा० २] हकारस्ये(स्य) ग्रभाक्षरादिस्थस्य यदाऽग्रतः तदा हकार एव लभ्यते। 'अ इ ए उ' एतेषां कंठ्यानां अन्यतमादिस्थस्य 'आ ई ऊ ऐ औ अं अः' एतेषां अपरिशिष्टस्वराणां अन्यतमो यदाऽग्रतः स्थितमेवाद्यमन्यतरं तदा कंठ्या(ठ्य) स्वरं लभते ॥ ३४५ ॥

उक्कारादिसु एवं, पढमंतरिओ ण एइ परभावं।
अभिहमं(म्मं)तो पुरओ, आदित्त(ल्ल?)मणंतरं लभइ ॥ ३४६ ॥

उकारस्य हकारस्य प्रथमस्य ग्रभाक्षरादिस्थस्य यथाऽग्रतोऽनंतरं ककारः प्रथमो दृश्यते तदा हकार एव लभ्यते। हकार(रे) ककारेणालिंगिते आदिस्थो [प० २१८, पा० १] हकार एव लभ्यते। उकारस्य कंठ्यसंयोगकरणम् ॥ ३४६ ॥

†.....तीस भायए सदा कालं ।
जं सेसं सा हु तिही, वोच्छं णक्खत्तकरणं से ॥
लद्धाओ जा तिथीओ, या(हीणा) रूपेण कण्ण(ण्ह)पक्खस(स्स) ।
मुक्कं पि दोहि भाए, माससनामादिरिक्खगणं ॥

सर्वदा प्रश्नकालिनी छाया राम(श)यो द्वादश होरेति पंचदशानां संज्ञा प्रश्नाक्षरश्च । सर्वमेतदेकीकृत्य तृन्स(त्रिंश)त्पंचगुणाक्षेपः । वर्तमानतिथियुक्तं च कृत्वा शेषं गतार्थः ॥अन्य(ना?)दर्शमेतत्॥

पढमो विसमो उ सरो, बितिओ य समो तइज्जओ सम्मो ।
विसमसमो य चउत्थो, सेसा एवं सरचउक्का ॥ ३४७ ॥

प्रश्नाक्षराणामादिस्थो गकारो विष[म] इति इकारयुक्त गकारमेव लभते । प्रश्नाक्षरादिस्थो घकार स ईकारयुक्तो घकार एव लभते । दकारो विषम उकारयुक्तो दकार एव लभते ॥ ३४७ ॥

एवं समवग्गाणं, चउक्कया विसमवग्गयाणं च ।
णायव्वा णंतरओ, विसमा [प० २१९, पा० १] विसमाण संजोए ॥ ३४८ ॥

समस्वरे[ण] युक्तसमाक्षरस्तमेव लभते । विस(ष)मस्वरेण युक्तो विषमाक्षरो लभ्यते । एवं सर्वे ककारादयो हकारान्ताः समस्वरे(रै)र्युक्ताः समाक्षरास्तमेव लभन्ते । विषमस्वरैर्युक्ता विषमाक्षरास्त एव लभ्यन्ते ॥ ३४८ ॥

समसंजोएण समो, लभइ अ विसमो य विसमसंजोए ।
वग्गे दिट्ठो एसो, भणिओ वग्गक्खरवि[प० २१९, पा० २]भाओ ॥ ३४९ ॥

समस्वरयोगे व्यंजनं समं लभ्यते । स्वरं च विषमस्वरसंयोगे उत्तरत्वाद् विषमाक्षरो लभ्यते । स्वरश्च विषम एव प्राग्व[द]र्थः । ततोऽक्षरस्वरविभागे लब्धिरिति ॥ ३४९ ॥

॥ संकट-विकटं समाप्तम् ॥

वग्गक्खरा तिपु(गु)णिया, खेवो पढमक्खरस्स वग्गंमि ।
तिसु चउसु अधो अट्ठे, तंमि य णा[म]क्खरं वग्गे ॥ ३५० ॥

प्रश्नाक्षराः । एवं वर्गाक्षराः । प्रश्नाक्षराणां विद्यमानस्वराणां या संख्या तामेकीकृत्य तृ(त्रि)गुणां कृत्वा प्रश्नाक्षराणां ककारादीनां हकारांतानां अन्यतमादौ दृष्टा पूर्वतृ(त्रि)गुणितपिंडात् पंच प्रक्षिप्य ये ककारादीनां हकारांतानां [प० २२०, पा० १]प्रश्नाक्षराणामन्यतमादौ दृष्टे तस्मिन्नेव संख्या पिंडाख्या चतुरक्षिप्यास्ताभिर्भागेऽपहृते शेषे तकारादिवर्गो लभ्यते । लब्धानां पुनः सप्तभिर्भागे पल(यल्ल)ब्धं यच्च शेषं तयोः ककारादिवर्गो लभ्यते ॥ ३५० ॥

अक्खरसरिसा जोणी, मत्तासरिसं च जाणए रूवं ।
एवं सेण विभत्ते, वग्गेण निरूविओ भेओ ॥ ३५१ ॥

† अस्या गाथाया एष पूर्वार्द्धः खण्डितरूपेण उपलभ्यतेऽत्रादर्शे । परं अग्रे ८५ तमे पृष्ठे इयं गाथा अखण्डात्मिका पुनर्लिखिता लभ्यते । आदर्शान्तरभेदेनेयं पुनरुक्तिरत्र जाता सम्भाव्यते ।

जीव-धातु-मूलाक्षरैः पूर्वोक्तैर्जीवधातुमूलयोनिनिर्देशकार्यः(र्यं?) मात्राभिर्द्रष्टव्यम् । रूपं शुक्लं कृष्णं पीतं रक्तादि । लक्षणं दीर्घमल्पं वृत्तं इति । जीव-धातु-मूलोत्तराधरैः पंचभिर्भेदः प्रश्नाक्षराणां निरूपयितव्यो वर्गप्रतिबन्धः ॥ ३५१ ॥ [प० २२०, पा० २]

पढम-तइए य चरिमा, वग्गा पासंडिया तहा भणिया ।
सेसा य अपासंडी, णिद्दिट्ठा पण्हइत्तेहिं ॥ ३५२ ॥

प्रथम-तृतीय-पंचमवर्गाणां अन्यतमबहुले प्रश्ने पाखंडिनो ज्ञेयाः । के ते ? प्रव्रजिताः अरहन्तादयः आजीविकादयश्च । शेषाणां द्वितीय-चतुर्थ-वर्गाक्षराणां अन्यतमाधिके प्रश्ने अपाखंडिनो ज्ञेयाः । [प० २२१, पा० १] अपाषंडिन इति गृहस्था भण्यन्ते ॥ ३५२ ॥

पढमो वग्गो पासंदाहिण (दाहिणपासं?) बिइ(ई)य एव चउत्थे य।
रा(वा)मं तइए मज्झं, दो पासे पंचमं जाण ॥ ३५३ ॥

प्रथमवर्गाक्षरबहुले प्रश्ने तैरेव प्रथमवर्गाक्षरैरनभिहतैर्दक्षिणपार्श्वे पुरुषस्य लांछनं ज्ञेयम् । अनभिहतैः स(श)स्त्रप्रहार इति । द्वितीय-चतुर्थवर्गाक्षराणामन्यतमबहुले [प० २२१, पा० २] प्रश्ने तैरेव द्वितीय-चतुर्थवर्गाक्षरैरनभिहते वामपार्श्वे लांछनं प्रत्येतव्यम् । अभिहतैस्तैरेव शस्त्रैः प्रहारादिकम् ॥ ३५३ ॥

पढमसरे सिरभागं, णिडालयं होइ तह कवग्गंमि ।
चिबुयं[च] चवग्गंमि, गिवप्पएसो टवग्गंमि ॥ ३५४ ॥

प्रथमस्वरग्रहणेन अवर्गो गृह्यते । तेन सिरो ज्ञेयः । कवर्गे निडालं । चवर्गे[प० २२२, पा० १] चिबुकं । टवर्गे ग्रीवाप्रदेशा(शः) ॥ ३५४ ॥

हियं च तवग्गंमि, कडिय पवग्गंमि होइ नायव्वा ।
ऊरू [य] यवग्गंमि, जाणु पव(ए)सो सवग्गंमि ॥ ३५५ ॥

तवर्गाक्षरबहुले प्रश्ने हृदयं ज्ञेयम् । पवर्गबहुले प्रश्ने कटी ज्ञेया । ज(य)वर्गबहुले ऊरू ज्ञेयौ । जाणु(नु)पादौ सवर्गबहुले ॥ एवं अष्टविभागांगकल्पना । [प० २२२, पा० २] पंच(एवं?)-प्रदेशभागकल्पनार्थः(र्थमाह?) ॥ ३५५ ॥

सीसो य अवग्गंमि, णिडालदेसो तहा कवग्गंमि ।
अच्छी य चवग्गंमि अ, णासा हु तहा टवग्गंमि ॥ ३५६ ॥

यदभिहितं अवर्गबहुले प्रश्ने शिरो ज्ञेयः, तस्येदानीमवयवा[न्] तैरेव वर्गाक्षरैराह – अवर्गाक्षरबहुले प्रश्ने मूर्द्धजाः प्रत्येतव्याः । [प० २२३, पा० १] कवर्गाक्षरबहुले प्रश्ने ललाटं ज्ञेयम् । चवर्गबहुले प्रश्ने लोचने । टवर्गे नासिका ॥ ३५६ ॥

वक्कं होइ तवग्गे, अहरोट्ठा तह पवग्गए भणिया ।
चिबुयं च [य]वग्गंमि, होइ य गीवा सवग्गंमि ॥ ३५७ ॥

तकारा(वर्गा)धिके वक्त्रम् । पवर्गाधिके ओष्ठौ । यवर्गे चिबुकः । शवर्गे ग्रीवा इति ॥३५७॥

एतेसु पए[प० २२३ पा० २]सेसुं, एतेभि अभिहएहि वग्गेहिं ।
मसयं तिलयं सत्थ-क्खयं च कमसो वियाणाहि ॥ ३५८ ॥

सिर(शिरः)प्रभृतयो ये प्रदेशा यैरक्षरा(रै)रुक्ताः तैरनि(न)भिहतैः अधिकैः प्रभै(श्रे) स प्रदेशो निरुपद्रवो वक्तव्यः । अभिहतैरुपरु(द्र)वयुक्तः । चचा(?शस्त्रा)भिघातस्तृ(स्त्रि)विधः । तत्र तैर्वर्गाक्षरैरालिंगितैः मस(श)कं तिलकं च वक्तव्यम् । अभिधूमितैर्ब्राह्मणं(णैर्व्रणं) दग्धैस्तु स(श)स्त्र-प्रहारः तत्र प्रदेशे वक्तव्यः ॥ ३५८ ॥

भणिएहि वयणदेसे, वग्गेहि य अभिहएहि जाणिज्जा ।
मसय-तिलयाइ सव्वं, चिण्हं गुरुप(ज्झप्प)एसेसु ॥ ३५९ ॥

वदने यानि[प० २२४, पा० १] चिह्नानि अभिह(हि)तानि तैरभिहतैरक्षरैस्तानि मशकतिल-कादीनि गुह्यप्रदेशे ज्ञेयानीति ॥ ३५९ ॥

॥ अस्त्रविभागप्रकरणमंगस्य ॥

सत्तम-णवमो य रवी, चंदो वि य होइ पढम-तइएणं ।
भोमो बीय-चउत्थे, पंचम-छट्ठो य ससिसुओ भणिओ ॥ ३६० ॥

सप्तमस्वर एकारः, णवम उ(ओ)कारः । एतौ सूर्यस्य । चन्द्रः प्रथम-तृतीयैः 'अ इ' । भौमो द्वितीय-चतुर्थैः 'आ ई' । बुधः 'उ ऊ' ॥ ३६० ॥

एक्कारस सूरसुओ, जीवो दसमे य अट्ठमे सुक्को ।
बारसमो वि य राहू, एते सरसामिया भणिया ॥ ३६१ ॥

अं शनिः । औ गुरुः । शुक्र ऐ । अः [प० २२४, पा० २] राहुः । स्वराणां सा(स्वा)मित्वं ग्रहाख्यातं तन्नामप्रतिबद्धवस्तूपचयापचयोदया-स्तमन-जया जयोत्पातादिना ज्ञेयाः ॥ ३६१ ॥

॥ स्वरक्षेत्रभवनम् ॥

रवि-भोम-सुक्क-बुह-गुरु-सणि-यं(चं)दो राहु अट्ठमो एते ।
अ क च ट त प य श वग्गाण होंति खेत्ताहिवा णियया ॥ ३६२ ॥

अ क च ट त प य श वर्गाणां ग्रहाः क्षेत्राधिपा उक्ताः । तत्प्रतिबद्धाक्षरवस्तुग्रहैः अस्त-मिदा(मना)दिह्रासवृद्धिर्ज्ञेया इति ॥ ३६२ ॥

पण्हक्खरसत्तमु(गु)णं, तिहिसहियं उ(ओ)मरत्तपरिसुद्धं ।
मत्त(?सत्ते)हि भागसेसे, सुजा(ज्जा)इ[प० २२५, पा० १]गहा मुणेयव्वा ॥३६३॥
सुन्नं छएण वा (च?)उरो, तिण्णि य दो तह य रूवमिक्कं तु ।
सूरादीणं एते, उमा(ऊसा?) संझा तहा कमसो ॥ ३६४ ॥

दिनकरानयनम् ॥ ३६३–३६४ ॥

छाया सासी होसा, पण्हक्खरयं च होइ तीसगुणं ।
पक्खो वा तिण्णि सया, सट्ठासतिहि(?) तं सव्वं ॥ ३६५ ॥

तीसगुणं काऊणं, सीया(तीसा)ए हायए सया कालं ।
जं सेसं सा उ तिही, वोच्छं णक्खत्त-करणं से ॥ ३६६ ॥
लद्धाइ(ओ) जा तिहीओ, हीणा रूवेण कण्हपक्खस्स ।
सु(मु?)क्कंमि(पि?) दोहिं च भवे, मासस्स नामरिक्खगणं ॥ ३६७ ॥

सर्वदा प्रश्नकालिनी छाया रास्य(श)यो द्वादश । होरेति पंचदशानां संज्ञा । प्रश्नाक्षरश्च । [प० १२५, पा० २] [सर्व?]मेतदेकीकृत्य तृत्सत्या(त्रिंशता)गुणा शून्यक्षेपः ३६० वर्तमानातिथियुक्तं च कृत्वा । शेषं गतार्थम् । अनादर्थ(र्श?)मेतत्तिथी(थि)नक्षत्रकांडम् ॥ ३६५–३६७ ॥

गंधव्वाह(इ) अवग्गे, दिट्ठे विज्जाहरा कवग्गंमि ।
पमाहाहा(?) [च]वग्गंमि, णागय(?) य(ट)वग्गमिति ॥ ३६८ ॥

[इयं गाथा अस्पष्टार्था । न चास्या व्याख्यालेशो लभ्यते । –संपादकः ।]

जक्खा य [त]वग्गंमि, देवा भणिया तहा पवग्गंमि ।
णागा य यवग्गंमि, भूया जाणे सवग्गंमि ॥ ३६९ ॥

तवर्गाधिके प्रश्ने यक्षा । पवर्गाधिके देवा । यवर्गाधिके नागा । स(श)वर्गाधिके भूताः ॥ ३६९ ॥

पेया य षवग्गंमि, जाण सकारे य तह पिसाया य ।
कोहंडा य हकारे, एवं जाणिज्ज[प० २२६, पा० १]णुक(क्क)मसो ॥ ३७० ॥

ख(ष)काराधिके प्रश्ने प्रेताः । सकाराधिके पिशाचाः । हकाराधिके कुष्मांडाः ॥ ३७० ॥

अणुणासिएसु असुरा, णायव्वा यं(अं)मि दीसए जंमो ।
सविसग्गंमि अकारे, जक्खा सुणया य संजोए ॥ ३७१ ॥

अनुनासिकबहुले असुरा । अ(अं)कारः सानुस्वारः, तदधिके प्रश्ने यमो ज्ञेयः । अकारः सविसर्गः, तदधिके प्रश्ने यक्षा ज्ञेयाः । संयोगाक्षराधिके प्रश्ने स्वा(श्वा)नरूपिणो यक्षा ज्ञेयाः ॥ ३७१ ॥

एएहि अक्खरेहिं, जाणसु अभिघाइएसु मरणं तु ।
जो(जा) जस्स देवया अक्ख[र]स्स तेणेव सा भणिया ॥ ३७२ ॥

यस्य यस्य देवताविशेषस्य येऽक्षराः पूर्वाभिहितास्तैरहि(रभिह)तैस्तस्मात् तस्मात् देवताविशेषात् सकासा(शा)न्म[प० २२६, पा० २]रणमपि ज्ञेयम् ॥ ३७२ ॥

पढमय-बीय(बि-तिय)चउत्थो, पंचमवग्गो य तह ध णायव्वो ।
वाइय-पित्तिय-सिंभिय-सन्निवाइय अक्खरा कमसो ॥ ३७३ ॥

प्रथमवर्गाधिके प्रश्ने वातिका व्याधिरादेश्या(श्य)। द्वितीयवर्गे पैत्तिका । तृतीयवर्गे श्लेष्मा । चतुर्थवर्गाक्षराधिके प्रश्ने सान्निपातः । पञ्चमवर्गाक्षराधिके प्रश्ने क्षयो व्याधिरादेश्यः । प्रष्टुरन्यस्य वा यं व्याधिकृत्पृच्छतीति ॥ ३७३ ॥

पणयालसयं अट्ठुत्तरं च दोट्ठावग्गाहिवुव(ध?)रासी ।
अवसा(से)साणं छण्हं, एक्कोत्तरिया हवइ विट्ठी(ट्ठी) ॥ ३७४ ॥

पूर्वादिस्थस्य प्रादक्षण्येन बुधक्रा(?)विन्यस्य प्रश्नाक्षरसहितं कृत्वा गुणयेत् ॥ ३७४ ॥

पंच य सत्त य णव तेरसे य अट्ठादसमे य सोलसयं ।
बत्तीसं तित्तीसं, जाणसु गुणकार रासीओ ॥ ३७५ ॥

पूर्वादितः प्रश्ना सहिता बुधका(?) यथास्थितप्रस्तु[त]दिक्चक्रं गुण्य सोधनिकां यथास्वं विशोधयेत् ॥ ३७५ ॥

पंचगतिगछसत्तट्ठमा य ते होंति सोहणा कमसो ।
धय धूमे(म) सीह साणा, वसहंमि पुक्कितिया एते ॥ ३७६ ॥
णियव(?णवय)क्खरंमि जाणे, सोहणयं चोदसे तु वाणि(?) ।
पण्णरसगए भरिया, सोलसढके वियाणाहि ॥ ३७७ ॥
एसो [सो] संखेवो, भणिओ जिणभासिओ समासेण ।
जाव य णिट्ठइ णामं, लाभालाभेसु सव्वेसु ॥ ३७८ ॥

एष सः उक्तेन प्रकारेण सात्त्विकाय पुरुषाय बुद्धिबलं ज्ञात्वा, ने(नै)तदभव्यापि(य) नास्तिके(का)याश्रद्धधानया(नाय) अकुलपुत्राय जात्यादा(द)ज्ञात्यसंपन्नाय देयम् । गुरुशुश्रूषकाय ज्ञानवते चास्तिकाय देयमिति । जिनग्रहणपरिज्ञानार्थं कृतं यो यन्नामाक्षरैरक्षरैः लाभालाभादि स सर्वं वक्तव्यं प्रश्ने [इ]ति ॥ ३७६–३७८ ॥

॥ प्रश्नव्याकरणं समाप्तम् ॥

॥ संवत् १३३६ वर्षे चैत्र शु० १ ॥ इति संपूर्णम् ॥

ज्ञानदीपकाख्यं
चूडामणिसारशास्त्रम् ।

नमिऊण जिणं सुरअणचूडामणिकिरणसोहिपयजुयलं ।
इय चूडामणिसारं कहिय मए जा(ना)णदीवक्खं ॥ १ ॥

जिनमर्हंतं सुरगणचूडामणिकिरणशोभितपादयुगलं नत्वा इदं चूडामणिसारं ज्ञानप्रदीपाख्यं मया कथ्यत इति ॥ १ ॥

पढम-तईय-सत्तम-रंधसरा पढम-तईयवग्गवण्णाइं ।
आलिंगियाइं सुहया उत्तर-संकडअणामाइं ॥ २ ॥

अ इ ए ओ एते प्रथम-तृतीय-सप्तम-नवमाश्चत्वारः, तथा क च ट त प य श ा ग ज ड द ब ल सा एते प्रथम-तृतीय[वर्ग]चतुर्दशवर्णाश्च आलिंगिताः, सुभगाः, उत्तराः, संकटनामकाश्च भवन्तीति ॥ २ ॥

कुच-जुग-वसु-दिस-सरआ बीय-चउत्थाइं वग्गवण्णाइं ।
अहिधूमिआइं मज्झा ते उण अहराइं वियडाइं ॥ ३ ॥

आ ई ऐ औ एते द्वितीय-चतुर्थाष्टम-दशमाश्चत्वारः स्वराः, तथा ख छ ठ थ फ र ष ाः घ झ ढ ध भ व ह ाः एते द्वितीय-चतुर्थवर्गाणां चतुर्दशवर्णाः अभिधूमिताः, मध्यास्तथा उत्तराधरा विकटाश्च भवन्तीति ॥ ३ ॥

सर-रिउ-रुद्द-दिवाअर-सराइं वग्गाण पंचमा वण्णा ।
दड्ढाइं वियड-संकड-अहराहर-असुहणामाइं ॥ ४ ॥

उ ऊ अं अः एते पंचम-षष्ठिका एकादशम-द्वादशमाश्चत्वारः स्वराः, तथा ङ ञ ण न म इति वर्गाणां पंचमा वर्णाः दग्धाः विकटसंकटा अधरा अशुभनामकाश्च भवन्ति ॥ ४ ॥

सव्वाण होइ सिद्धी पण्हे आलिंगिएहि सव्वेहिं ।
अहिधूमिएहिं मज्झा णासइ दड्ढेहिं सयलेहिं ॥ ५ ॥

प्रश्ने आलिंगितैः सर्वैः सर्वेषामेव सिद्धिर्भवति, [अभिधूमितैर्मध्या सिद्धिः] दग्धैः सर्वैः सिद्धिर्नश्यति ॥ ५ ॥

उत्तरसरसंजुत्ता उत्तरआ उत्तरुत्तरा हुंति ।
अहरेहिं उत्तरतमा अहरा अहरेहिं णायव्वा ॥ ६ ॥

उत्तरसंज्ञकैः स्वरैः संयुक्ता उत्तरसंज्ञका एव वर्णा उत्तरतमा भवन्ति । त एव अधरा-
धरसंज्ञकैः स्वरैः संयुक्ता उत्तरसंज्ञका अधरसंज्ञकाश्च भवन्तीति ॥ ६ ॥

अहरसरेहिं जुत्ता ते दड्ढा हुंति अहरअहरतमा ।
कज्जाइं साहंति सुअ(इ)रं अधमा अधमाइं किं बहुणा ॥ ७ ॥

अधरसंज्ञकैः स्वरैः संयुक्ता दग्धा वर्णा अधराधरतरसंज्ञका भवंति । ते च सुचिरकालेन अधमाधमानि कार्याणि साधयन्ति किंबहुनेति ॥ ७ ॥

दड्ढसरेहिं जुत्ता दड्ढतमा हुंति दड्ढया वण्णा ।
ते णासयंति कज्जं बलाबलं मीसयेसु सयलेसु ॥ ८ ॥

दग्धसंज्ञकैः स्वरैः संयुक्ता दग्धसंज्ञका वर्णा दग्धतमसंज्ञका भवन्ति तेषां बलत्वान्निःफलं भवति ॥ ८ ॥

आलिंगिएहिं पुरिसो महिला अहिधूमिएहिं सव्वेहिं ।
दड्ढेहिं होइ संढो जाणिज्जइ पण्हपडिएहिं ॥ ९ ॥

आलिंगितैर्वर्णैः प्रश्ने पतितैः पुरुषो भवति । अभिधूमितैः स्त्री । दग्धैर्नपुंसकमिति जानीतेति ॥९॥

जइ वग्गाण य वण्णा पढम-बीय-तीय-चउत्थ-पंचमया ।
तह विप्प-राय-वयसा सुद्दो विय संकरा य सयलाइं ॥ १० ॥

यदि वर्गाणां वर्णाः प्रथम-द्वितीय-तृतीय-चतुर्थ-पंचमकाः, तदा विप्र-राजन्य-विट्-शूद्राः, अपि च संकरजातयः सर्व एव भवन्तीति ॥ १० ॥

एदेहिं वण्णेहिं कमेण बालो कुमारओ तरुणो ।
मज्झिमवयो वि थविरो जाणिज्जइ पण्हपडिएहिं ॥ ११ ॥

तथा एतैरेव वर्णैः प्रश्ने पतितैः क्रमेण बालः कुमारस्तरुणो मध्यमवया वृद्धश्च भवतीति जानीहि ॥ ११ ॥

आलिंगिएहिं विट्ठी मज्झा अहिधूमिएहिं सा होइ ।
दड्ढेहिं णत्थि विट्ठी जिणवयणं सच्चियं जाण ॥ १२ ॥

आलिंगितैर्वृष्टिः, अभिधूमितैर्मध्यमा वृष्टिः, दग्धे नास्ति वृष्टिरिति जिनवचनं सत्यमेव जानीहि ॥ १२ ॥

अइउप्पज्जइ सस्सं पण्हे आलिंगिएहिं वण्णेहिं ।
अहिधूमिएहिं किंचण णासइ दड्ढेहिं णो चित्तं ॥ १३ ॥

अतिशयेनोत्पद्यते सस्यं प्रश्ने आलिंगितैर्वर्णैः, अभिधूमितैः किंचिदुत्पद्यते, दग्धैर्नश्यति, अत्र नो चित्रमिति ॥ १३ ॥

संपदिकालं पण्हे वण्णो आलिंगिओ पयासेइ ।
अहिधूमिओ वि भूअं दड्ढो उण भावियं णूणं ॥ १४ ॥

प्रश्ने आलिंगितो वर्णः संप्रतिकालं प्रकाशयति । अभिधूमितोऽपि भूतम् । दग्धः पुनर्भाविकालं नूनमिति ॥ १४ ॥

तह पढम बीय तइआ वण्णा वुच्चंति तिण्णि कालाइं ।
मा इत्थ करह भंती जहसंखं सयलवग्गाणं ॥ १५ ॥

तथा समस्तवर्गाणां प्रथम-द्वितीय-तृतीयवर्णाः यथासंख्यं त्रीन् कालान् ब्रुवन्ति। अत्र मा भ्रांतिं प्रकुरुतेति ॥ १५ ॥

आलिंगिएहिं मुक्कइ वाहिं अहिधूमिएहिं ण हु रोई ।
अहवा चिरेण कट्ठं दड्ढो मरणं पयासेइ ॥ १६ ॥

आलिंगितैर्व्याधिं रोगी मुंचति, अभिधूमितैर्न मुंचति, अथवा चिरेण कष्टात् मुंचति, दग्धश्च मरणमेव प्रकाशयति ॥ १६ ॥

विसमा दाहिणपासे वामे य वणं समा य पयडंति ।
वण्णा पण्हे पडिया पंचमया बेवि पासंमि ॥ १७ ॥

प्रश्ने पतिता विषमाः प्रथम-तृतीयवर्णा दक्षिणपार्श्वे तथा समाः द्वि-चतुर्था वर्णाः वाम-पार्श्वे पंचमका वर्णाः उत्तरपार्श्वे व्रणं प्रकाशयन्ति ॥ १७ ॥

अट्ठ सिरो-मणि-वयण-हियय-कडि-उरु-जाणु-चरणजुयलेहिं ।
पण्हविलग्गा वग्गा वणाइं दरिसंति जहसंखं ॥ १८ ॥

अष्टौ वर्गाः प्रश्नविलब्धाः यथासंख्यं शिरोललाटवदने[षु] तथा हृदय-कटि-ऊरु-जानु-चरण-युगलेषु व्रणा निदर्शयन्ति ॥ १८ ॥

अणिलय-पित्तय-सेफय-संसग्गय-आहिघाययं रोगं ।
पयडंति पंचवग्गा जहसंखं पढम उद्दिट्ठा ॥ १९ ॥

प्रथमोद्दिष्टाः पंचवर्गाः यथासंख्यं अनिलजं पित्तजं श्लेष्मजं संसर्गजं अभिघातजं रोगं प्रकटयन्ति ॥ १९ ॥

अइमंद-मज्झ-दारुणपीडाइं दिंति पण्हपडिआइं ।
आलिंगियाहिधूमियदड्ढा वण्णा जहासंखं ॥ २० ॥

आलिंगिताभिधूमितदग्धा वर्णाः प्रश्नपतिता यथासंख्यं अत्यन्तमन्दमध्यदारुणां पीडां प्रकटयन्तीति ॥ २० ॥

आलिंगिएहिं संधी ण हु संधी विग्गहे(हो) ण अहरेहिं ।
अहराहरेहिं कहिओ समरो सुहडाण णासयरो ॥ २१ ॥

आलिंगितैः संधिर्भवति, अधरैर्न च संधिर्न च विग्रहः, अधराधरैः संग्रामः सुभटानां नाशकर इति ॥ २१ ॥

विजयं उत्तरवण्णो ण जयं ण पराजयं वि अहरेहिं ।
अहराहरो पयासइ पराजयं णत्थि संदेहो ॥ २२ ॥

उत्तरो वर्णो विजयं प्रकाशयति, अधरो वर्णो न जयं न पराजयं, अधराधरश्च पराजय-मेवेत्यत्र नास्ति संदेहः ॥ २२ ॥

जइ पढमक्खरमहरं अवसाणे उत्तरक्खरं पण्हे ।
ता उत्तरो सुबलिओ विवरीओ ताण विवरीयं ॥ २३ ॥

जयपराजयप्रश्ने यदा प्रथमाक्षरमधरं अवसाने च उत्तरमक्षरं भवति तदा उत्तरो बली भवति ॥ २३ ॥

पढमसरेण य जुत्ता पण्हे मत्ताविवज्जिया वण्णा ।
अणभिहिअणामआ दे पअडंति य जीवचिंताइं ॥ २४ ॥

प्रथमस्वरेण युक्ता अन्यमात्राविवर्जिता वर्णाश्च ते प्रश्ने अनभिहितनामका भवंति ते च जीवचिंतां प्रकटयन्ति ॥ २४ ॥

ससि-तइअ-पंच-सत्तम-नवमसरा रुद्दसंखसरसहिया ।
क-च-टा पंचमहीणा सहिया य-स-हेहिं जीवक्खा[1] ॥ २५ ॥

प्रथम-तृतीय-पंच-सप्तम-नवमाः स्वराः एकादशस्वरसहिताः, तथा कवर्ग-चवर्ग-टवर्गाः पंचमहीनाः, यकार-शकार-हकारसहिता एते एकविंशतिवर्णाः जीवाख्या भवन्तीति ॥ २५ ॥

बीओ छट्ठो सरओ सविसग्गो तह व-सक्खरोपेओ ।
तह उण पंचमहीणा त-पवग्गा धाउणामा उ ॥ २६ ॥

द्वितीयः षष्ठः स्वरः, सविसर्गः, तथा वकार-सकारोपेतः, तथा पुनस्तवर्गः पवर्गः पंच-महीन एते त्रयोदशवर्णा धातुनामका भवन्ति ॥ २६ ॥

ई ऐ औ सरजुत्ता र-ल-षा ङ-ञ-ण-न-माइं वण्णाइं ।
एआरह मूलक्खा पयासिया जिणवरिंदेण ॥ २७ ॥

चतुर्थाष्टमदशमस्वरयुक्ता र-ल-षकारा ङ-ञ-ण-न-माश्चेत्येकादश वर्णा मूलाक्षरप्रकाशका भवंतीति । एतेनैतदुक्तं भवति लाभप्रश्ने धातुलाभः, मूलाक्षरैर्जीवलाभः, धात्वक्षरैर्जीवाक्षरैर्मूलाभ इति नात्र कार्या विचारणा ॥ २७ ॥

मुट्ठीजीवक्खरए मूलं जीवं वि मूलअक्खरए ।
धाउं उण जाणिज्जह धाउक्खरएण किं चोज्जं ॥ २८ ॥

मुष्टौ जीवाक्षरैर्मूलं ज्ञातव्यम्, जीवं च मूलाक्षरैः, धातुं धात्वक्षरैरेवेति किमित्याश्चर्यमिति ॥ २८ ॥

बहुपढमवग्गवण्णा अह बहुबिंदू विसग्गसंजुत्ता ।
बहुवन्ना जह पण्हे ता सुन्नं मुट्ठिचिंताइं ॥ २९ ॥

प्रश्ने यदि बहवः प्रथमवर्गवर्णा भवन्तीति, अथवा बहुबिंदुविसर्गसंयुक्ता भवन्ति, अथवा प्रश्ना एव बहवो भवन्ति तदा मुष्टिचिन्तायां शून्यं भवति ॥ २९ ॥

---

१ प्र० जीवक्खरा ।

विसमसरा ऊआरो वग्गाणं पढम-तइयवण्णाइं ।
दुप्पय-णराण एसा एआहाराण णहु होइ ॥ ३० ॥

विषमस्वराः प्रथम-तृतीय-पंचम-सप्तम-नवमैकादशमाः, तथा ऊकारश्च, तथा वर्गाणां प्रथम-तृतीयवर्णाश्च एते द्विपदेषु नराणां वर्णाः, एतदाहाराणां राक्षसानां न भवन्तीति ॥ ३० ॥

बीओ दसमो सरओ वग्गाणं बीयवण्णया सयला ।
दिसंति जइअ पण्हे ता मुणह चउप्पयं जीवं ॥ ३१ ॥

यदि प्रश्ने चतुर्थाष्टद्वादशः स्वरो भवति, तथा वृश्चिकादीनां जातिं दृष्टिं च व्याघ्रादिकं तं तवर्गवर्णो वदति, तथा वर्गाणां चतुर्था वर्णाश्च तदा चतुष्पादा जीवा भवन्ति ॥ ३१ ॥

जइ वग्गाण य वण्णा पंचमया हुंति पण्हपडियाइं ।
ता मुणह णरअवासिय भूअपिसाचाइं सव्वाइं ॥ ३२ ॥

यदि वर्गाणां पंचमा वर्णाः प्रश्ने पतन्ति भवन्ति, तदा नारकवासिनो भूतपिशाचाश्च सकलान् जानीतेति ॥ ३२ ॥

मत्ता त-पवग्गेहिं य-शवग्गेहिं हुंति सउणा य ।
सिद्धा सरेहिं भणिया देवा उण क-च-टवग्गेहिं ॥ ३३ ॥

तवर्ग-पवर्गाभ्यां मर्त्याः, यवर्ग-शवर्गाभ्यां शकुनाः, स्वरैः सर्वैरेव सिद्धाः, देवाः पुनः कवर्ग-चवर्ग-टवर्गैर्भवन्तीति ॥ ३३ ॥

चवइ कवग्गो पण्हे लद्धो थलचारियं विहंगमयं ।
तं चिअ अइप्पहाणं[2] तवग्गओ णत्थि संदेहो ॥ ३४ ॥

प्रश्नलब्धः कवर्गः स्थलचारिणं विहंगमं वक्ति । तमेव स्थलचारिणं विहंगमं अतिप्रधानं मयूरादिकं तवर्गो वक्तीति संदेहो नास्ति ॥ ३४ ॥

जइ अ चवग्गो लद्धो तह पक्खी[3] होइ जलयरो णूणं ।
तं पि टवग्गे सिट्ठं चवइ पवग्गो गुहसयंधं[4] ॥ ३५ ॥

यदि चवर्गो लब्धः तदा जलचराः पक्षिणो भवन्ति । नूनं तमपि जलचरं पक्षिणं श्रेष्ठं हंसादिकं टवर्गो वक्तीति । अधमं (अन्धं ?) च गुहाशयं उलुकादिकं पवर्गो वक्तीति ॥ ३५ ॥

पण्हे कवग्गवण्णा कालोरय-सिंगिणो पयासंति ।
राजीवसप्पजाई चवग्गवण्णा य दंतत्थं ॥ ३६ ॥

प्रश्ने कवर्गवर्णाः कालोरगाश्च शृंगिणश्च वृषभादीनि प्रकाशयन्ति । राजीवसर्पजातिं शंखचूडादिकं दंतास्त्रं च हस्तिप्रभृतिकं चवर्ग्गवर्णाः प्रकाशयन्तीति ॥ ३६ ॥

---

१ प्र० मुणहु । २ प्र० अइपमाणं । ३ प्र० पंखी । ४ प्र० वच्चइ पवग्गो सअधमं ।

गोणाससप्पजाई टवग्गवण्णा फुडं पयासंति ।
लहुअविसाणं जाई दिट्ठीणं होई तवग्गवण्णेहिं ॥ ३७ ॥

गोनसो सर्पजातिं टवर्ग्गवर्णाः स्फुटं प्रकाशयन्ति । लघुकविषाणां जंतूनां वृश्चिकादीनां जातिं दृष्टिं च व्याघ्रादिकं तं तवर्ग्गो वर्णो वदति ॥ ३७ ॥

विसमच्छ-दाहि(ढि ?)दुंदुहि-कीडविसेसाइं किं चुज्जं ।
जइ किर लद्धो पण्हे पवग्गओ पण्हचउरेण ॥ ३८ ॥

यदि प्रश्नचतुरेण प्रश्ने पवर्गो विलब्धस्तदा विषमत्स्यान् शृंगिकाप्रभृतीन् दंष्ट्रान् मकरनक्रप्रभृतीन् दुंदुभिप्रभृतिकीटविशेषकान् वक्ति अत्र किमाश्चर्यमिति ॥ ३८ ॥

ससि-जलण-बाण-मुणि-गह-रुद्द-सरा वग्गाण दु-तीयवण्णा य ।
वुच्चंति धम्मधाउं[1] अधमं चिय सेससरवण्णा ॥ ३९ ॥

प्रथम-तृतीय-पंचम-सप्तम-नवमैकादशमाः स्वराः, तथा कवर्गादिसप्तवर्गाणां द्वितीयवर्णाश्च धाम्यधातुं वदन्तीति ॥ ३९ ॥

रवि-रुद्द-पक्खसरओ पंचमहीणा कवग्गवण्णा य ।
कणयं चवन्ति तारं सत्तमवग्गो मुणिंदुसरओ य ॥ ४० ॥

द्वादशमैकादशम-द्वितीयस्वराः पंचमहीनाः कवर्गवर्णाश्च कनकं वदन्ति । रजतं च सप्तमो वर्गः तथा सप्तमः प्रथमः स्वरश्चेति ॥ ४० ॥

तंबं[2] च तइओ सरओ पंचमहीणो चउत्थओ वग्गो ।
लोहं दसमो सरओ अट्ठमवग्गो मकारो[3] य ॥ ४१ ॥

ताम्रं तृतीयस्वरः पंचमहीनः चतुर्थो वर्गश्च, लोहं दशमस्वरः तथाष्टमो वर्गो मकारश्च वदति वचनपरिणामेन पूर्वतो न वर्तत इति ॥ ४१ ॥

वंगं तइओ वग्गो पंचमहीणो कवग्गपंचमओ ।
अट्ठम-पंचमसरओ पण्हे लद्धो पयासेइ ॥ ४२ ॥

वंगं त्रपु पंचमहीनस्तृतीयो वर्गः, तथा कवर्गपंचमो वर्णश्च, तथाऽष्टमः पंचमः स्वरः प्रश्ने लब्धः प्रकाशयतीति ॥ ४२ ॥

छट्ठसरो एकंतो पंचमवण्णो[4] अ तईयवग्गस्स ।
जइ पाविज्जइ पण्हे ता णूणं सीसअं मुणह[5] ॥ ४३ ॥

षष्ठस्वर एकाकी तथा तृतीयवर्गस्य पंचमो वर्णश्च यदि प्रश्ने प्राप्यते तदा नूनं सीसकं कथयन्ति ॥ ४३ ॥

न-प-फ-म-भा ऊ वण्णा पण्हे लद्धा कुणंति पित्तलयं ।
ण-त-था द-धा इ-आरा कंसं ण हु अत्थि संदेहो ॥ ४४ ॥

---

१ प्र० धाम° । २ प्र० तंमं । ३ प्र० तह म° । ४ प्र० °वग्गो वि । ५ प्र० भणए ।

नकार-पकार-फकार-[मकार]-भकारस्तथा ऊकारश्च एते प्रश्ने लब्धाः पित्तलकं कथयन्ति । णकार-तकार-थकार-दकार-धकार-इकारश्च एते कांस्यं कथयन्ति । तथा अत्र न खलु संदेहोऽस्तीति ॥ ४४ ॥

कणयक्खरं पयासइ मरगयमाणिक्कपहुईरयणाइं ।
मुत्ताहीरयपहुइं तारक्खरयं णे संदेहो ॥ ४५ ॥

कनकाक्षरं मरकतमाणिक्यप्रभृतिरत्नानि प्रकाशयति, ताराक्षरं च मुक्ताहीरकप्रभृतिकं प्रकाशयति ॥ ४५ ॥

कक्करतालयपहुदिं [तं]वक्खरयं [च] भणइ णो चित्तं ।
लोहक्खरेहिं जाणह रयणाइं इंदनीलपहुदीणि ॥ ४६ ॥

ताम्राक्षरः तालकप्रभृतिं भणति नात्र चित्रम्, लोहाक्षरैश्च इंद्रनीलप्रभृतीनि रत्नानि जानीतेति ॥ ४६ ॥

कंसक्खरं पयासइ रयणऽसेसाइं काचपहुदीणि ।
सेसं सीसयपहुदिं पित्तलसीसाइ अक्खरयं ॥ ४७ ॥

कंसाक्षरं काचप्रभृतीनि रत्नविशेषाणि प्रकाशयति । शेषं पित्तलसीसकाद्यक्षरं शीशकप्रभृतीनि रत्नविशेषं प्रकाशयति ॥ ४७ ॥

उत्तरवण्णपहाणं पण्हे गढियं पयासए णिच्चं ।
धाउमगढिअं अहरं अक्खरयं भणइ सच्चमियं ॥ ४८ ॥

प्रश्ने उत्तरवर्णाः प्रश्नमक्षरं नित्यं घटितं धातुं प्रकाशयति । अधरमक्षरं अघटितं धातुं भणतीति सत्यमिदम् ॥ ४८ ॥

आलिंगिएहिं जाणह कंकणकेऊरपहुदि आहरणं ।
अहरक्खरेहिं गढिअं कच्चोलयपहुति भायणयं ॥ ४९ ॥

घटिते धातोर्लब्धे सति पुनरपि प्रश्ने आलिंगिताक्षरैः घटितं केयूरप्रभृतिकमाभरणकं भवतीति । अधराक्षरैर्घटितं कच्चोलकप्रभृति भाजनं भवति ॥ ४९ ॥

उत्तरवण्णपहाणं पण्हे दरिसेइ अहिणवाहरणं ।
अहरक्खर अपहाणं उवभुत्तं णत्थि संदेहो ॥ ५० ॥

आभरणे प्राप्ते सति पुनरन्यप्रश्ने उत्तरवर्णप्रधानं प्रश्नमभिनवाभरणं दर्शयति । अधराक्षरेऽप्रधानं च उपाभरणं दर्शयतीति नास्ति संदेहः ॥ ५० ॥

सव्वे उत्तरवण्णा भवंति सुरलोअलोअणाहरणं ।
अहरक्खराइ णूणं माणवलोयस्स जंतूणं ॥ ५१ ॥

पुनरन्यप्रश्ने सर्व एवोत्तरवर्णाः सुरलोकानामाभरणं ब्रुवन्ति । अधराक्षराणि मानवलोकस्य द्विपदचतुष्पदजंतूनामाभरणं ब्रुवन्ति ॥ ५१ ॥

---

१ प्र० °पहुदि । २ प्र० णत्थि । ३ प्र० सच्चं च ।

दुप्पयवण्णा पण्हे दुप्पअजंतूण चवइ आहरणं ।
सो वि णर-णारयाणं विहगाणं विहगवण्णेहिं ॥ ५२ ॥

पुनरन्यप्रश्ने द्विपदवर्णा द्विपदजंतूनामाभरणं ब्रुवन्तीति । विहगवर्णाश्च विहंगानामाभरणं ब्रुवन्ति ॥ ५२ ॥

जइ य चउप्पयवण्णा पण्हे लद्धाइं हुंति पउराइं ।
मा करहु इत्थ भंती जाणिज्ज चउप्पयाहरणं ॥ ५३ ॥

पुनरन्यप्रश्ने यदि चतुष्पदवर्णाः प्रश्ने लब्धाः प्रचुरा भवंति तदा मा भ्रांतिं कुरुत चतुष्पदाभरणं जानीतेति ॥ ५३ ॥

दिस-कुच-वेयट्ठमया सरया दरिसंति उद्धआहरणं ।
ससि-तिय-गह-सत्तमया मज्झंगे सेस अद्धाणं ॥ ५४ ॥

दशम-द्वितीय-चतुर्थाष्टमकाः स्वराः ऊर्द्ध्वदेहाभरणं दर्शयन्ति । प्रथम-तृतीय-नवम-सप्तमकाश्च मध्यदेहाभरणं दर्शयंति ॥ ५४ ॥

आहरणाण य वण्णा संसिट्ठा हुंति जई य त-पउरा ।
ता तं रयणणिबद्धं भायणयं ताण वण्णेहिं ॥ ५५ ॥

यद्याभरणानां वर्णाः संश्लिष्टाः संबद्धाः तवर्ग्गप्रचुरा भवन्ति तदाऽऽभरणं रत्ननिबद्धं भवति, भाजनवर्णैश्च संबद्धैर्भाजनं रत्ननिबद्धं भवति ॥ ५५ ॥

जइ पउरउत्तरद्धं ता रयणं सुद्धजाइयं मुणहु ।
तं अहरक्खरबद्धं कित्तिमयं मीसिए मिस्सं ॥ ५६ ॥

यदि ततः प्रचुरोत्तराधरसंबंधे.....कृत्रिमजातिमिश्रितं च इतः ज्ञास्यतेति ॥ ५६ ॥

उत्तम-मज्झिम-अधमा हुंति य णाणा तहा जहासंखं ।
आलिंगियाहिधूमियदड्ढयपत्तेहिं पण्हेहिं ॥ ५७ ॥

तथा आलिंगिताभिधूमितदग्धके प्राप्ते प्रश्ने उत्तममध्यमाधमानि नाणकानि टंककानि शिवांकादिकानि यथासंख्यं भवन्तीति ॥ ५७ ॥

पढमं तरूण वण्णा तह ससि-गहसंमिओ सरो चेव ।
क-च-टादुआण(? °ण दुइय)वण्णा दसमओ दुज्जो सरो वेवि ॥ ५८ ॥

क-च-टादिवर्गानां सप्तानां प्रथमो वर्णस्तथा प्रथम-नवमस्वरश्च एते नववर्णाः तरूणामाम्रादीनां वाचकाः, कवर्ग-चवर्ग-टवर्गाणां च द्वितीयवर्णाः ख-छ-डास्तथा दशम-द्वितीयौ स्वरौ च एते पंच वर्णा लतानां द्राक्षादीनां वाचका इति ॥ ५८ ॥

रिउ-बाण-रुद्दसरओ पंचमवण्णा तिणाइ जंपंति ।
सेसदुइज्जा वण्णा वल्लीं वग्गाण चत्तारि ॥ ५९ ॥

षष्ठ-पंचमैकादशस्वरः, तथा वर्गाणां कवर्गाणां सप्तानां पंचमाश्च वर्णास्तृणानि दूर्वादीनि जल्पन्ति । शेषा द्वितीया वर्णाः चत्वारि तवर्ग-पवर्ग-यवर्ग-शवर्गाणां चतुर्णां वल्लीनां बूलीप्रभृतिकां जल्पन्ति ॥ ५९ ॥

अट्ठम-चउअं तिसरा चउत्थवण्णेण ठाइआ तिण्णि ।
जंपंति ख-छ-ठ-फाओ जाइविसेसाइं गुम्माइं ॥ ६० ॥

कवर्गादिसप्तवर्गाणां चतुर्थवर्णेन स्थापिताश्चतुर्थाष्टमांतिमास्त्रयः स्वराः ख-छ-ठ-फा जातिविशेषान् गुल्मान् जल्पन्ति ॥ ६० ॥

ग-ज-डेहिं होंति य लया सालादि सत्तमसरेहिं गहिएहिं ।
गहिएहिं दबलसेहिं प(ध ?)ण्णापहुदीनि जाणेह ॥ ६१ ॥

कवर्ग-चवर्ग-टवर्गाणां तृतीयवर्णेन भवन्ति तृतीय-सप्तमाभ्यां स्वराभ्यां शालादिकान् वृक्षान्, तवर्ग-पवर्ग-यवर्ग-शवर्गाणां चतुर्णां तृतीये वर्णे गृहीते धान्यकादीन् जानीतेति ॥ ६१ ॥

जल-साहारण-जंगलदेसपभूयं चवंति भूरुहयं ।
आलिंगिय-अहिधूमिय-दड्ढयवण्णा जहासंखं ॥ ६२ ॥

जलसाधारणं जांगलदेशप्रभूतं भूरुहं यथा जलजं कमलोत्पलादिकं जांगलजं करीरकरमर्दादिकं तानेतान् यथासंख्यं आलिंगिताभिधूमिता वर्णा ब्रुवन्तीति ॥ ६२ ॥

तरवो हुंति असोया संणिहिया उत्तरेहिं वण्णेहिं ।
अधरसरेहिं अधमा पण्हे पडिएहिं दूरट्ठा ॥ ६३ ॥

उत्तराक्षरैरशोकाद्यास्तरवः प्रत्यासन्ना भवन्ति । अधराक्षरैरधमा वृक्षाः सर्वत्र शाखोटकादयो दूरस्था भवन्ति ॥ ६३ ॥

संजुत्त-असंजुत्ता जहाकमं लद्ध[पण्ह]वण्णेहिं ।
फलियाफलिया तरुणो केवलिनाणेण भासंति ॥ ६४ ॥

संयुक्ता असंयुक्ता लब्धाः प्रश्नवर्णाः यथाक्रमं फलिताफलितान् तरून् केवलिकाज्ञानेन भाषन्ति इति ॥ ६४ ॥

तह दिवस-मास-पक्खय पुणो वि मासे वि तह य वच्छरए ।
जहसंखं लाहसुहं एसु य सयलेसु वग्गेसु ॥ ६५ ॥

एषु सर्वेषु वर्गेषु कवर्गादिसप्तस्वपि वर्गेषु एकद्वित्रिचतुःपंचमके वर्णे तस्मिन्नेव दिवसे लाभसुखादिकं चिन्तितं भवति । सर्वैर्द्वितीयवर्णैर्मासे उद्भवति, सर्वे तृतीयवर्णे पक्षे उद्भवति, सर्वे चतुर्थवर्णे पुनर्मासे एव उद्भवति, सर्वे पंचमवर्णे संवत्सरे उद्भवति ॥ ६५ ॥

उत्तरवण्णपहाणो उत्तरअयणं[1] पयासए पण्हे ।
अहरक्खरेसु पण्हे[2] दक्खिणअयणं णं[3] संदेहो ॥ ६६ ॥

---

१ प्र० डत्तरायणं । २ प्र० अधराखरपहाणं । ३ प्र० दक्खिणयणं णत्थि ।

उत्तरवर्णप्रधानप्रश्नः उत्तरायणं प्रकाशयति । अधराक्षरप्रधानश्च दक्षिणायनं प्रकाशयति अत्र नास्ति सन्देहः ॥ ६६ ॥

पढमक्खरेण सिसिरो महु वि तहा वीयएण वण्णेण ।
तीयक्खरेण गिम्हो चउत्थेण य पाउसो होइ ॥ ६७ ॥

कवर्गादिसप्तवर्गाणां प्रथमाक्षरेण प्रश्नप्राप्तेन शिशिरः, तथा द्वितीयवर्णेन मधुर्वसंतः, तृतीयाक्षरेण ग्रीष्मः, चतुर्थाक्षरेण प्रावृट् भवति ॥ ६७ ॥

सत्तमसरेहिं सरओ कहिओ अणुणासिएहिं हेमंतो ।
अं अ [ः ?] इ उ अक्खरयं पयासियं जिणवरिंदेण ॥ ६८ ॥

सप्तमस्वरे शरत् कथितः, अनुनासिके हेमंतः । इदं स्पष्टाक्षरं जिणवरेंद्रेण प्रकाशितमिति ॥ ६८ ॥

होइ च-टेहिं चित्तो वेसाहो होइ ग-ज-डवण्णेहिं ।
जिट्ठो वि द-ब-ल-सेहिं ई ओ घ-झ-ढेहिं आसाढो ॥ ६९ ॥

चवर्ग-टवर्गयोः प्रथमाक्षराभ्यां चैत्रो भवति । तथा कवर्ग-चवर्ग-टवर्गाणां तृतीयाक्षरैर्वैशाखो भवति । तवर्ग-पवर्ग-यवर्ग-शवर्गाणां तृतीयाक्षरैर्ज्येष्ठो भवति । चतुर्थ-दशमस्वराभ्यां तथा कवर्ग-चवर्ग-टवर्गाणां चतुर्थाक्षरैराषाढो भवति ॥ ६९ ॥

णहु होइ ध-भ-व-हेहिं सर-रिउसर ङ-ञ-णेहिं भद्दवओ ।
ए ऊ बिन्दु-विसग्गा सेसयवण्णेहिं आसिणओ ॥ ७० ॥

तवर्ग-पवर्ग-यवर्ग-शवर्गाणां चतुर्थाक्षरैर्नभः श्रावणो भवति । पंच-षड्भ्यां स्वराभ्यां कवर्ग-चवर्ग-टवर्गाणां पंचमाक्षरैर्भाद्रपदो भवति । अनुस्वार-विसर्गाभ्यामाश्विनो भवतीति ॥ ७० ॥

तह त-प कत्तिकमासो कहिओ पढमेहिं दोहिं वण्णेहिं ।
य-शवण्णेहिं वि दोहिं मियसरणामो य मासो य ॥ ७१ ॥

तवर्ग-पवर्गयोः प्रथमाक्षराभ्यां द्वाभ्यां तथा पुनः कार्तिको मासः कथितः, यवर्ग-शवर्गयोः प्रथमवर्णाभ्यां द्वाभ्यां मार्गशीर्षो नामधेयो मासः कथितः इति ॥ ७१ ॥

आ ई ख-छ-ठेहिं सहो थ-फ-र-षवण्णेहिं होइ तह माहो ।
फग्गुणमासो ससि-मुणिसरएहिं तह कवग्गेण ॥ ७२ ॥

द्वितीय-चतुर्थाभ्यां स्वराभ्यां तथा कवर्ग-चवर्ग-टवर्गाणां द्वितीयाक्षरैः सह पौषो मासो भवति । तवर्ग-पवर्ग-यवर्ग-शवर्गाणां द्वितीयवर्णैस्तथा माघो भवति । प्रथम-सप्तमस्वराभ्यां कवर्गस्य प्रथमाक्षरेण फाल्गुनमासो भवतीति ॥ ७२ ॥

दो तिन्नि पंच अट्ठा पंच य अट्ठा य तह य दो तिन्नि ।
चारिक्क सत्त छक्का सत्त छक्का य चारिक्का ॥ ७३ ॥

॥ इति जिनेन्द्रकथितं प्रश्नचूडामणिसारशास्त्रं समाप्तम् ॥

33188